# 13

# मिश्रिताभ्यासः

## अभ्यासः I

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत—**

पठनम् अतीव अरुचिकरं मन्यमानः सुवीरः हतोत्साहः भूत्वा कक्षस्य एकस्मिन् कोणे विचारमग्नः अतिष्ठत्। तस्य मनसि असफलतायाः कारणात् आत्मघातस्य भावना जागृता। दुःखितः भूत्वा आत्मचिन्तनं कुर्वन् सः भित्तिम् आरोहन्तम् एकं पिपीलकं पश्यति, यः पुनः पुनः पतित्वा अपि हतोत्साहितः न भवति, अपि तु सततं प्रयासेन सः अन्ततः भित्तिम् आरोहति तत्रस्थं मिष्टान्नं च प्राप्नोति। तस्य विवेको जागृतो भवति। आत्मनः आत्मघातस्य भावनां निन्दयन् सः चिन्तयति यत् यद्येष पिपीलकः सततप्रयासेन सफलः भवितुं शक्नोति तर्हि न किमपि असम्भवं जगति। एतद्विचिन्त्य सः पठनस्य पुनः पुनरभ्यासं कुर्वन् कक्षायां विशिष्टं स्थानं प्राप्तवान्। तस्मिन् एतत् परिवर्तनं दृष्ट्वा शिक्षकः तस्य प्रशंसां कुर्वन् बोधयति— “वत्स! वीरभोग्या वसुन्धरा। वसुधायां बहूनि वस्तूनि सन्ति परन्तु परिश्रमशीलाः वीराः एव तानि प्राप्नुवन्ति।”

## अभ्यासः

**(i) एकपदेन उत्तरत —**

(क) कः हतोत्साहः अभवत्? ..........

(ख) असफलतायाः कारणात् सुवीरस्य मनसि कस्य भावना जागृता? ..........

(ग) पिपीलकः भित्तौ किं प्राप्नोति? ..........

(घ) सुवीरः पुनः पुनरभ्यासेन किं स्थानं प्राप्तवान्? ..........

**(ii) पूर्णवाक्येन उत्तरत —**

(क) सुवीरः आत्मघातस्य भावनां निन्दयन् किं चिन्तयति?

..........

(ख) के वसुधायां वसूनि प्राप्नुवन्ति?

..........

© NCERT not to be republished

Reprint 2025-26

**(iii) यथानिर्देशम् उत्तरत —**

(क) 'स: अन्तत: भित्तिम् आरोहति'- अत्र किम् अव्यय-पदम्?

........................................................................................................

(ख) 'संसारे' इति पदस्य किं समानार्थकपदम् अनुच्छेदे प्रयुक्तम्?

........................................................................................................

(ग) 'तस्य विवेक: जागृत: अभवत्'- अत्र किं कर्तृपदम्?

........................................................................................................

(घ) 'वसुधायां बहूनि वसूनि सन्ति'- अत्र किं विशेषणपदम्?

........................................................................................................

**2. 'आत्मघात: कस्या: अपि समस्याया: समाधानं न भवति' एतद्विषयम् अधिकृत्य एकम् लघुम् अनुच्छेदं लिखत —**

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

**3. 'पठनस्य के लाभा:' - इति वर्णनं कुर्वन्त: मित्रं प्रति पत्रमेकं लिखत —**

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

**4. सन्धिच्छेद: सन्धि: वा क्रियताम् —**

(i) हतोत्साह: ............................+............................

(ii) विवेक:+जागृत: ........................................................



© NCERT not to be republished

(iii) स:+अन्तत: ............+............

(iv) एतद्विचिन्त्य ............

**5. समासं विग्रहं वा कृत्वा वाक्यानि पुन: लिखत—**

(i) सुवीर: <u>हत: उत्साह: यस्य स:</u> भूत्वा एकस्मिन् कोणे तिष्ठति।

............

(ii) तस्य मनसि <u>आत्मघातस्य</u> भावना जागृता।

............

(iii) स: अभ्यासं कुर्वन् कक्षायां <u>विशिष्टं स्थानं</u> प्राप्तवान्।

............

(iv) वत्स! <u>वीरै: भोग्या</u> वसुन्धरा।

............

**6. उचित-प्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत—**

(i) पठनम् अरुचिकरं ............ (मन्+शानच्) छात्रा: सफला: न भवन्ति।

(ii) सततप्रयासेन मन्दोऽपि सफल: ............ (भू+तुमुन्) शक्नोति।

(iii) अस्मिन् वर्षे अहम् कक्षायां विशिष्टं स्थानं ............। (प्र+आप+क्तवतु)

(iv) पुन: पुन: पतित्वा अपि हतोत्सहित: न ............। (भू+तव्यत्)

**7. प्रदत्तवाक्यानां वाच्यपरिवर्तनम् कृत्वा लिखत—**

(i) सुवीर: एकस्मिन् कोणे तिष्ठति।

............

(ii) पिपीलक: अन्तत: भित्तिम् आरोहति।

............

(iii) शिक्षकेण तस्य प्रशंसा क्रियते।

............

(iv) परिश्रमशीलै: वीरै: एव वसूनि प्राप्यन्ते।

............

**8. प्रदत्तवाक्यानां संस्कृतभाषया अनुवादं कुरुत—**

(i) उसका विवेक जागृत हो जाता है।

............

(ii) उसने वृक्ष पर चढ़ते हुए साँप को देखा।

............



© NCERT not to be republished

Reprint 2025-26

(iii) हमें पुन: पुन: पाठों का अभ्यास करना चाहिए।

..............................................................................................................

(iv) मुझे पढ़ना अच्छा लगता है।

..............................................................................................................

**9. प्रदत्तानि वाक्यानि शुद्धानि कृत्वा पुनः लिखत —**

(i) बालक: एकस्मिन् कोणे तिष्ठति। ..............................................

(ii) स: भित्तिम् आरोहन्तं पिपीलकं पश्यति। ..............................................

(iii) वसुधायां बहूनि वसूनि सन्ति। ..............................................

(iv) अहम् उत्साहित: भूत्वा तत्रागच्छम्। ..............................................

## अभ्यासः II

**1. लिखितमनुच्छेदं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत—**

वयं सर्वे सुखम् इच्छाम:। कोऽपि दु:खं नैव इच्छति। अत: दु:खानां विनाश: कथं भवति, इति ज्ञातव्यम्। गीतायाम् अर्जुनं प्रति श्रीकृष्ण: अकथयत्, "प्रसादे सर्वदु:खानां हानिरस्योपजायते।" अत: सर्वेषां दु:खानाम् अभावस्य कृते मनस: प्रसन्नता अत्यावश्यकी वर्तते। विपरीतपरिस्थितिषु ये धैर्यं न त्यजन्ति ते सर्वदा आन्तरिक-प्रसन्नताया: माध्यमेन प्रतिकूलपरिस्थिती: विरुध्य विजयम् अधिगच्छन्ति। प्रियजनस्य रुग्णतायां ये सेवां कृत्वा प्रसन्ना: भवन्ति ते न केवलम् प्रियजनस्य दु:खस्य अपि तु स्वदु:खस्य अपि विनाशं कृत्वा भूयोऽपि प्रसन्ना: भवन्ति, परन्तु ये आत्मन: परस्य वा रोगं, समस्यां वा दृष्ट्वा केवलं हाहाकारं कुर्वन्ति तेषां दु:खेषु वृद्धि: एव भवति। अत: विषाद: कदापि न कर्तव्य: प्रसन्नता च कदापि न त्याज्या।

**(i) एकपदेन उत्तरत —**

(क) प्रसादे केषां हानि: भवति? ..............................................

(ख) ये समस्यायां प्राप्तायां केवलं हाहाकारं कुर्वन्ति तेषां दु:खेषु किं भवति?

..............................................

**(ii) पूर्णवाक्येन उत्तरत —**

(क) प्रतिकूलपरिस्थिती: विरुध्य के विजयम् अधिगच्छन्ति?

..............................................................................................................

(ख) किं कदापि न कर्तव्यं किम् च न त्याज्यम्?

..............................................................................................................



© NCERT not to be republished

Reprint 2025-26

**(iii) निर्देशानुसारम् उत्तरत —**

(क) 'पराजयम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

..........................................................................................

(ख) 'तेषाम् दु:खेषु वृद्धि: भवति' इति वाक्यांशे 'भवति' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

..........................................................................................

(ग) 'सर्वेषाम्' इति सर्वनामपदम् अत्र कस्मै प्रयुक्तम्?

..........................................................................................

(घ) 'स्वस्य' इति पदस्य किं पर्यायपदम् अत्र आगतम्?

..........................................................................................

**(iv) गद्यांशस्य कृते समुचितं शीर्षकं लिखत।**

..........................................................................................

**2. प्रसन्नताया: महत्त्वविषये पञ्चवाक्यमितम् अनुच्छेदं सरलसंस्कृतेन लिखत-**

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

**3. गृहे पितु: रुग्णताया: कारणेन भवत:/भवत्या: मित्रम् दु:खित: अस्ति। तं सान्त्वयन्त: पत्रमेकं सरलसंस्कृतेन लिखत—**

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

© NCERT not to be republished

**4. अधोलिखितवाक्येषु रेखांकितपदानि अधिकृत्य सन्धिं/सन्धिविच्छेदं कुरुत—**

(i) हाहाकारेण तु दु:खेषु वृद्धि:+एव भवति। ........................

(ii) मनस: प्रसन्नता तु अत्यावश्यकी। ........ + ........

(iii) क: + अपि दु:खं नैव इच्छति। ........................

(iv) विषाद: कदापि न कर्तव्य:। ........ + ........

(v) वृद्धानां सेवां कृत्वा प्रसन्नो भव। ........ + ........

(vi) वयं सर्वे सुखम्+इच्छाम:। ........................

**5. रेखांकितपदानां समस्तपदं विग्रहं वा कृत्वा वाक्यानि पुन: लिखत—**

(i) दु:खानां विनाश: कथं भवति इति ज्ञातव्यम्।

........................

(ii) नीतिषु लाभालाभौ न विचारणीयौ।

........................

(iii) दु:खानाम् अभाव: मनस: प्रसन्नतायै आवश्यक:।

........................

**6. उचितप्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत—**

(i) दु:खानां विनाशस्य उपायं ज्ञा + तव्यत्। ........................

(ii) प्रियजनस्य रुग्णता दु:खदायिका। ........ + ........

(iii) रोगं दृष्ट्वा केवलं हाहाकारं न कर्तव्यम्। ........ + ........

(iv) त्वं प्रतिकूलपरिस्थितीं वि+रुध्+ल्यप् विजयं प्राप्नुहि। ........ + ........

**7. प्रदत्तवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखत—**

(i) गीतायां श्रीकृष्ण: अर्जुनं प्रति कथयति।

........................

(ii) वयं सर्वे सुखम् इच्छाम:।

........................

(iii) विनम्रजन: पितरं सेवते।

........................

(iv) पुत्रेण औषधै: पितु: रोगविनाशस्य प्रयत्न: क्रियते।

........................



© NCERT not to be republished

Reprint 2025-26

**8. प्रदत्तवाक्यानां संस्कृतभाषया अनुवादं कुरुत—**

(i) हम सभी सुख चाहते हैं।

..............................................................................................................

(ii) मन की प्रसन्नता कभी नहीं छोड़नी चाहिए।

..............................................................................................................

(iii) गीता में श्रीकृष्ण ने अर्जुन से कहा।

..............................................................................................................

(iv) वह प्रियजन की रुग्णता में सेवा करके प्रसन्न होता है।

..............................................................................................................

**9. प्रदत्तानि वाक्यानि शुद्धानि कृत्वा पुनः लिखत—**

(i) मूर्खा: जना: दु:खं दृष्ट्वा केवलं हाहाकारं करोति।

..............................................................................................................

(ii) दु:खानाम् अभावस्य कृते मनस: प्रसन्नता अत्यावश्यकी वर्तते।

..............................................................................................................

(iii) रोगं समस्यां वा दृष्ट्वा तस्य समाधानं कुरु।

..............................................................................................................

(iv) विषाद: कदापि न कर्तव्य:।

..............................................................................................................

© NCERT not to be republished



Reprint 2025-26